# संस्कृत-वार्ता:

**दिनाङ्क :- 31.03.2024**

**प्रात: - 06:55**

## अथ वार्ता:

### भारतरत्ना:

राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया राष्ट्रपतिभवने समायोजिते कार्यक्रमे प्राक्तनौ प्रधानमन्त्रिणौ पी.वी.नरसिम्हाराव-चौधरीचरणसिंहौ, कृषि-वैज्ञानिक: एम्.एस्. स्वामीनाथन:, बिहारस्य प्राक्तन: मुख्यमन्त्री कर्पूरीठाकुरश्च सर्वोच्च 'भारतरत्न' इति भारतीयनागरिकसम्मानेन मरणोपरान्ते सम्मानिता:। तत्रैव प्राक्तनाय उपप्रधानमन्त्रिणे श्रीलालकृष्ण- आडवाणीवर्याय सम्मानमिदं अद्य नवदिल्ल्यां राष्ट्रपतिभवने प्रदास्यते।

### प्रधानमन्त्री-भारतरत्नम्

प्रसंगेऽस्मिन् प्रधानमन्त्री नरेन्द्रमोदी एकस्मिन् सामाजिकसन्देशपटले लिखितवान् यत् एतत् भारतरत्नसम्मानं देशस्य विकासे विशिष्टतया कृषि-ग्रामीण-विकासयो: चौधरीचरण- सिंहस्य योदानायास्ति। असौ कथितवान् यत् पीवी नरसिम्हारावेन राष्ट्रप्रगतये आधुनिकीकरणाय च बृहत्तमस्तरे कार्यं निष्पादितम् आसीत्। एष: महोदय: एक: सम्मानितविद्वान् विचारकत्वेनाभिज्ञायते। कर्पूरीठाकुरं स्वीयवक्तव्ये निध्याय प्रधानमन्त्री प्रावोचत् यत् भारतरत्न- सम्मानं तस्मै श्रद्धांजलिस्वरूपं वर्तते। येन स्वीय सम्पूर्णजीवनं समाजिकन्याय-समानताभ्यां समर्पितम् अपि च डॉ.एम्.एस्. स्वामिनाथन-इत्यस्य प्रयासै: भारतदेश: खाद्योत्पादनक्षेत्रे उत्तुंगशिखरे स्थापितोस्तीति।

### भाजपा-घोषणा-पत्रम्

भाजपेति दलाध्यक्ष: जगत्प्रकाश-नडडा इत्यनेन आगामिनं लोकसभानिर्वाचनम् अभिलक्ष्य नैर्वाचनिक-घोषणा-पत्र-समिति: घोषिता। सप्तविंशति: सदस्यानां समिते: आध्यक्ष्यं श्रीराजनाथसिंह: करिष्यति। वरिष्ठा भाजपेतिदलनेत्री निर्मला-सीतारमण: समिते: संयोजिका, पीयूषगोयलश्च सहसंयोजक: भविष्यति।

### प्रधानमंत्री-मेरठ

भाजपेतिदलस्य वरिष्ठनेता अपि च प्रधानमंत्री नरेन्द्रमोदी अद्य मेरठ नगरे एकां जनसभां सम्बोधयन् उत्तरप्रदेशे निर्वाचनाभियानस्य प्रारम्भं करिष्यति। अवधेयं वर्तते यत् भाजपेति-दलेन रामायण-धारावाहिक-प्रसिद्ध-नायक: अरुणगोविल: अस्मात् लोकसभा-क्षेत्रात् निर्वाचनसमरांगणे अवतारित:। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथ: राष्ट्रिय-लोक-दलाध्यक्ष: जयन्तचौधरी भाजपादलस्य अन्ये च वरिष्ठनेतार: उपस्थिता: भविष्यन्ति। ध्यातव्यमस्ति यत् उत्तरप्रदेशे सप्तचरणेषु मतदानं भविष्यति। अशीति: लोकसभासनै: युक्त: अस्ति अयं प्रदेश: ।

### सेनेगल राष्ट्रपति:

पश्चिमीय-अफ्रीकाया: सेनेगलदेशस्य संवैधानिक-परिषदा विपक्ष-प्रत्याशिन: बस्सिरौ-डियोमाये-फेय-इत्येतस्य राष्ट्रपति-निर्वाचने विजय: सुनिश्चीकृत:। येन हि देशस्यास्य पञ्च राष्ट्रपतित्वेन तस्य मार्गस्योद्घाटनं जातम्। गतरविवासरे जाते राष्ट्रपतिनिर्वाचने फेय-इत्यनेन चतु:पञ्चाशत् प्रतिशतं अधिकं मतदानानि विजितानि। अप्रैलमास्य द्वितीये दिनांके असौ राष्ट्रपतिपदभारं स्वीकरिष्यति।

**<u>आई.पी.एल्</u>**

आई.पी.एल् इति क्रिकेट स्पर्धा-मालिकायां ह्यः रात्रौ लखनऊनगरस्य अटलबिहारी-वाजपेयी-एकाना-क्रिकेट-क्रीडांगणे-लखनऊ-सुपर-जाएंट्स -दलेन पञ्जाब-किंग्सदलं एकविंशति धावनांकैः पराजितम्।

तत्रैव अद्य सार्ध त्रिवादने अहमदाबादनगरस्य नरेन्द्रमोदी-क्रीडांगणे गुजरात-टाइटन्सदलं सनराइजर्स हैदराबाद इत्येतं दलं सम्मुखीकरिष्यति। सार्ध सप्तवादने विशाखापत्तनमस्य  वाई.एस्. राजशेखर-रेड्डी क्रीडांगणे डेल्ही कैपिटल्स-दलस्य प्रतिस्पर्धा चेन्नई-सुपर-किंग्स-दलेन सह भविष्यति।

**॥ इति वार्ताः ॥**